अस्याम् प्रश्नपत्रपुस्तिकायाम् 37 प्रश्नाः एवम् 8 मुद्रित पृष्ठाः सन्ति।

Roll No.
अनुक्रमाङ्कः

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

**Code No. 69/SS/A/S**
**कोड नं०**
**Set / सेट** **A**

# SANSKRIT
# संस्कृतम्
# (309)

Day and Date of Examination ..........................................................................
(परीक्षादिवसः दिनाङ्कश्च)

Signature of Invigilators 1. ..........................................................................
(निरीक्षकयोः हस्ताक्षरम्)

2. ..........................................................................

---

**सामान्य अनुदेशाः —**

1. परीक्षार्थी प्रश्नपत्रपुस्तिकायाः प्रथमपृष्ठे स्व-अनुक्रमाङ्कम् अवश्यं लिखतु।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्षणीयम्।
3. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।
4. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कोड संख्या 69/SS/A/S, सेट A अवश्यमेव लेखनीया।

# SANSKRIT
# संस्कृतम्
# (309)

परीक्षासमयावधिः (Time) होरात्रयम् (3 Hours) पूर्णाङ्काः (Full Marks)—100

**निर्देशाः**— (i) अस्मिन् प्रश्नपत्रे आहत्य 37 प्रश्नाः सन्ति ।

(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति।

(iii) **समे** प्रश्नाः अनिवार्याः।

(iv) प्रश्नपत्रेऽस्मिन् पञ्चभागाः सन्ति।

(1) Answers of all questions are to be given in the Answer-Book given to you.
सभी प्रश्नों के उत्तर आपको दी गई उत्तर-पुस्तिका में ही लिखें।

(2) 15 minutes time has been allotted to read this question paper. The question paper will be distributed at 2:15 p.m. From 2:15 p.m. to 2:30 p.m., the students will read the question paper only and will not write any answer on the Answer-Book during this period.
इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण दोपहर में 2:15 बजे किया जाएगा। दोपहर 2:15 बजे से 2:30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे।

**[A]** पाठाधारित-प्रश्नानां समुचितं विकल्पं चिनुत— 1×15=15

**1.** परदुःखेन के दुःखिनः भवन्ति? 1

(क) सेवकाः (ख) ब्राह्मणाः

(ग) साधवः (घ) व्यापारिणः

**2.** दामोदरः कस्याः कुब्जत्वं दूरीकृतवान्? 1

(क) गोपिकायाः (ख) मदनिकायाः

(ग) भिक्षुण्याः (घ) दास्याः

**3.** मातृभूमेः महाराजस्य च किं प्रत्यर्पयितुं लब्धदत्तेन प्रयासः कृतः? 1

(क) धनम् (ख) अन्नम्

(ग) ऋणम् (घ) सुवर्णम्

**4.** सलिलातिभारं वहन्तः के गच्छन्ति? 1

(क) मेघाः (ख) सागराः

(ग) नदाः (घ) निर्झराः

**5.** मेघानां स्वनैः के प्रबुद्धाः? 1

(क) श्वानः (ख) मयूराः

(ग) मण्डूकाः (घ) साधवः

**6.** 'अर्वते' शब्दस्य कोऽर्थः? 1

(क) अश्वाय (ख) उष्ट्राय

(ग) मृगाय (घ) वृषभाय

**7.** हिमालयस्य सौन्दर्यं केन न नष्टं जातम्? 1

(क) सूर्येण (ख) मेघेन

(ग) पाषाणेन (घ) हिमेन

**8.** कः गोमायुं सचिवपदे नियुक्तम् अकरोत्? 1

(क) व्याघ्रः (ख) मृगः

(ग) पौरिकः (घ) शार्दूलः

**9.** कैः सुशोभितम् आकाशमण्डलं राजते? 1

(क) तारकैः (ख) कपोतैः

(ग) चन्द्रतारकैः (घ) मेघैः

**10.** ऋषयः प्रजाभ्यः पशुभ्यः च किं कामयन्ते? 1

(क) आहारः (ख) जलम्

(ग) अभयम् (घ) रक्षणम्

**11.** दुर्वासाः कस्य तनयः आसीत्? 1

(क) अत्रेः (ख) ब्रह्मणः

(ग) कश्यपस्य (घ) वशिष्ठस्य

**12.** कः विषयः विज्ञानक्षेत्रे परिगण्यते? 1

(क) यन्त्रविज्ञानम् (ख) सङ्गीतम्

(ग) नक्षत्रज्ञानम् (घ) अध्यात्मम्

**13.** सुश्रुतस्य अद्यतनख्यातिः केन कारणेन अस्ति? 1

(क) ओषधिप्रदानेन (ख) आरोग्यकरणेन

(ग) नासाप्रतिष्ठापनेन (घ) चिकित्साकरणेन

**14.** 'कष्टं न्यासस्य रक्षणम्' कस्मात् पुस्तकात् संगृहीतोऽयं पाठः? 1

(क) मेघदूतात् (ख) स्वप्नवासवदत्तात्

(ग) मालविकाग्निमित्रात् (घ) मृच्छकटिकात्

**15.** चारुदत्तस्य मते दरिद्रेषु दुर्लभं किं भवति? 1

(क) धनम् (ख) सत्यम्

(ग) धैर्यम् (घ) विवेकः

**[B]** अस्मिन् भागे **सप्त** प्रश्नाः सन्ति— 20

समुचितं भावार्थ**द्वयं** चिनुत— 1×2=2

**16.** भो पुत्र! यो दुःखी, स सुहृदि दुःखं निवेद्य सुखी भवति।

(क) चिरंजीवी कथयति हे पुत्र! दुःखी जनः स्वदुःखं मित्रं प्रति निवेद्य सुखी भवति।

(ख) कोऽपि कस्यापि दुःखं निवारयितुं न प्रयतते।

(ग) यो जनः आत्मदुःखं मित्रं प्रति निवेदयति तस्य दुःखं मृतम् भवति।

**17.** काले फलति सौभाग्यम्— 1×2=2

(क) केवलं श्रमेण कार्यं न सिद्ध्यति।

(ख) सत्कर्मणां फलं तु यथासमयं प्राप्यते एव।

(ग) नरः धैर्येण पुण्यकर्माणि कुर्वन् तत्फलं प्राप्नोतु।

**18.** सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानाम् उदयति एष सूर्यः — 1×2=2

(क) सूर्यः सर्वेषु प्राणिषु, वस्तुषु वृक्षेषु च ऊर्जया विद्यमानः प्रजानां प्रायभूतः उदेति।

(ख) सूर्यः सहस्ररश्मिभिरेव सर्वान् जीवान् न रक्षति।

(ग) सूर्यः प्रकृतिसंरक्षकः प्राणिनां च जीवनाधारभूतः अस्ति।

**19.** मञ्जूषासहायतया प्रदत्तश्लोकस्य भावार्थं पूरयत— 1×4=4

दुःखेन श्लिष्यते भिन्नं श्लिष्टं दुःखेन भिद्यते।
भिन्नाश्लिष्टा तु या मैत्री न सा स्नेहेन वर्तते॥

भावार्थः —या मैत्री एकस्मिन् क्षणे *(i)* ______ भवति, अन्यस्मिन् क्षणे *(ii)* ______ भवति तस्यां *(iii)* ______ स्नेहस्य *(iv)* ______ वर्तते।

**मञ्जूषा**

| संयुक्ता, मैत्र्याम्, भिन्ना, अभावः |
|---|

**20.** अधोलिखितवाक्येषु रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं करोतु— 1×5=5

(क) बकासुरः प्रतिदिनं <u>जनान्</u> भक्षयति।

(ख) सूर्यसमं ज्योतिः <u>ब्रह्म</u> अस्ति।

(ग) <u>कल्पनाचावलायाः</u> वैमानिक्यां विशिष्टा रुचिः आसीत्।

(घ) <u>सरस्वती</u> सुरैः असुरैः मुनिभिः नरैः च वन्दनीया।

(ङ) राजा च <u>अक्षतदेहः</u> विराजते।

**21.** अधोलिखितकथनेषु सत्यम् असत्यं **वा** चिनुत— 1×3=3

(क) इन्द्रः पृथिव्यै वर्षीयान्।

(ख) एकः पौरिकः नृपः परमदयालुः आसीत्।

(ग) विकिरणप्रमाणेन ओजनपटले साम्प्रतम् अपक्षयः दृश्यते।

**अथवा**

वेदेषु सर्वत्र कल्याणकामना दृश्यते।

**22.** केवलं प्रश्न**द्वयं** संक्षेपेण उत्तरत— 1×2=2

(क) समसामयिकसाहित्यं किम्?

(ख) दूतकाव्यं किम्? एकम् उदाहरत।

(ग) आर्यभटस्य कस्मिन् क्षेत्रे महत्त्वपूर्णं योगदानं वर्तते?

**[C]** अनतिदीर्घोत्तरैः **त्रयः** प्रश्नाः समाधेयाः — 5×3=15

**23.** 'पतन्ति परपीडकाः' **अथवा** 'कष्टं न्यासस्य रक्षणम्' इति पाठस्य सारांशो लेख्यः।

**24.** 'कल्पनाकीर्तिः विजयते' इति पाठस्य विषयवस्तु संक्षेपेण वर्णनीयम्।

**25.** 'काले फलति सौभाग्यम्' पाठमाधृत्य लब्धदत्तस्य चरित्रं वर्णयत।

**अथवा**

'कष्टं न्यासस्य रक्षणम्' इति पाठमाधृत्य चारुदत्तस्य चरित्रं वर्णयत।

**[D]** प्रायोगिक-व्याकरणे प्रश्नाः — 30

**26.** सन्धिं सन्धिविच्छेदं **वा** कृत्वा लिखत— 1×5=5

(क) पतति + आम्रफलम्

(ख) घनोपगूढम्

(ग) कश्चित् + आगतः

(घ) कः + अपि

(ङ) रसाकुलम्

**27.** विग्रहं समस्तपदं **वा** लिखत— 1×5=5

(क) सस्नेहम्

(ख) माता च पिता च

(ग) दिनं दिनं प्रति

(घ) नीलोत्पलम्

(ङ) दशाननः

**अथवा**

चतुर्युगम्

**28.** रेखाङ्कितपदेषु प्रकृति-प्रत्यय-योजनं विभागं **वा** कुरुत— 1×5=5

(क) तेन स्वकार्यं कृ + क्त।

(ख) सः जलं पातुम् आगतः।

(ग) सा उत्सवं दृश् + क्त्वा गमिष्यति।

**अथवा**

छात्रः आश्रमं प्रविश्य गुरुं प्रणमति।

(घ) कश्चिदेव फलानि क्री + क्तवतु।

(ङ) गुरुं सत् + कृ + ल्यप् सेवेत।

**अथवा**

त्वं भारतस्य नागरिकः असि।

**29.** उदाहरणमनुसृत्य शब्दरूपाणां मूलशब्दं विभक्तिं वचनं च लिखत— 1×4=4

| | शब्दरूपाणि | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| यथा— | कन्याकुमार्याः | कन्याकुमारी | षष्ठी | एकवचनम् |
| (क) | शिलायाम् | ______ | ______ | ______ |
| (ख) | श्रद्धया | ______ | ______ | ______ |
| (ग) | मम | ______ | ______ | ______ |
| (घ) | मुनिभिः | ______ | ______ | ______ |
| | **अथवा** | | | |
| | विद्वांसम् | ______ | ______ | ______ |

**30.** अधोलिखितक्रियापदानां धातुं लकारं च दर्शयत— 1×3=3

| क्रियापदानि | धातुः | लकारः |
|---|---|---|
| यथा— लिखामि | लिख् | लट् |
| (क) वहन्ति | ______ | ______ |
| (ख) भविष्यति | ______ | ______ |
| (ग) लभते | ______ | ______ |
| **अथवा** | | |
| अक्रीडत् | ______ | ______ |

**31.** मञ्जूषासहायतया रिक्तस्थानेषु उचितम् अव्ययपदं प्रयुज्यताम् — 1×4=4

(क) त्वम् ______ विद्यालयं गच्छ।

(ख) मेघाः ______ गर्जन्ति।

(ग) यत्र श्रमः ______ सफलता।

(घ) ______ स्वतन्त्रतादिवसोत्सवः भविष्यति।

**अथवा**

विश्वे ______ शान्तिः भवेत्।

**मञ्जूषा**

| सर्वत्र, उच्चैः, श्वः, अपि, तत्र |
|---|

**32.** उपपदविभक्तिं मेलयत— ½×4=2

| **उपपदम्** | **विभक्तिः** |
|---|---|
| (क) सह | *(i)* द्वितीया |
| (ख) बहिः | *(ii)* चतुर्थी |
| (ग) नमः | *(iii)* तृतीया |
| (घ) प्रति | *(iv)* पञ्चमी |

**33.** मेलनं कुरुत— ½×4=2

| **ग्रन्थाः** | **लेखकाः** |
|---|---|
| (क) यन्त्रसर्वस्वम् | *(i)* गर्गः |
| (ख) यन्त्रकल्पम् | *(ii)* अगस्त्यः |
| (ग) शक्तिसूत्रम् | *(iii)* नारदः |
| (घ) धूमप्रकरणम् | *(iv)* महर्षिः भारद्वाजः |

**[E]** रचना-कौशलम्— 20

**34.** अधोलिखितं विषयमधिकृत्य मञ्जूषासाहाय्येन दशवाक्येषु एकम् अनुच्छेदं लिखत— 5

**'प्रातःभ्रमणम्'**

**मञ्जूषा**

| |
|---|
| शान्तं वातावरणम्, उषाकाले, शयनात् उत्थाय, प्रतिदिनम्, प्राकृतिकपरिवेशे, मित्रेण सह, उद्यानम्, तडागपरिसरम्, मानसिकविकासः, परिभ्रमेत्, स्वच्छवायुः, वहति, शरीरं स्वस्थम्, व्यायामम्, योगः। |

**अथवा**

**'मम विद्यालयः'**

**मञ्जूषा**

| |
|---|
| वरिष्ठ माध्यमिक-सहशिक्षा-विद्यालयः, द्विसहस्रछात्राः, पञ्चाशत् शिक्षक-शिक्षिकाः, पुस्तकालयः, क्रीडाक्षेत्रम्, सांस्कृतिक-कार्यक्रमाः, विज्ञानम्, वाणिज्यम्, कला, सङ्गीतम्, अनुशासनम्, सुन्दरं भवनम्, आदर्शः विद्यालयः, प्रधानाचार्यः। |

**35.** भवान् राघवः। भवतः मित्रं प्रणवः मण्डलस्तरीयभाषणप्रतियोगितायां प्रथमं स्थानं लब्धवान्। तस्य उत्कृष्टसफलतायै वर्धापनपत्रं छात्राः लेखिष्यन्ति। 5

**36.** संवादलेखनम्— 5

भवतः नाम प्रकाशः। भवतः मित्रं विकासः अस्ति। भवतः मित्रस्य एकादशकक्षायाम् आदर्शविद्यालये प्रवेशो जातः। मित्रेण सह तस्य विद्यालयस्य विषये जातसंवादं लघुदशवाक्येषु लिखत।

**अथवा**

भवतः नाम रमेशः। विद्यालये पर्यावरणगोष्ठ्यां मित्रेण महेशेन सह जातसंवादं लघुदशवाक्येषु लिखतु।

**37.** 'महानगरेषु प्रदूषण-समस्या' इति विषयमधिकृत्य एका परियोजना निर्मीयताम्। 5

**अथवा**

'महाकुम्भपर्वणः परम्परा' इति विषयमधिकृत्य एका परियोजना निर्मीयताम्।

★ ★ ★